| | | | |
|---|---|---|---|
| [1]नेग्यम्, | नेज्यम्, | निनिक्ष्यम्, | नेनिज्यम्; |
| ईषन्नेजः-दुर्नेजः-सुनेजः; | | — | — |
| निज्यमानः, | नेज्यमानः, | निनिक्ष्यमाणः, | नेनिज्यमानः; |
| नेगः, | नेजः, | निनिक्षः, | नेनिजः; |
| नेक्तुम्, | नेजयितुम्, | निनिक्षितुम्, | नेनिजितुम्; |
| निक्तिः, | नेजना, | निनिक्षा, | नेनिजा; |
| नेजनम्, | नेजनम्, | निनिक्षणम् | नेनिजनम्; |
| निक्त्वा, | नेजयित्वा, | निनिक्षित्वा, | नेनिजित्वा; |
| प्रणिज्य, | प्रणेज्य, | प्रणिनिक्ष्य, | प्रणेनिज्य; |
| नेजम् २, निक्त्वा २, | नेजम् २, नेजयित्वा २, | निनिक्षम् २, निनिक्षित्वा २, | नेनिजम् २; नेनिजित्वा २. |

## (674) "णिदि कुत्सायाम्" (I-भ्वादिः-66. सक. सेट्. पर.)

'कुत्सायां सन्निकर्षे वा, कुत्सामात्रे तु निन्दति ॥' (श्लो 114) इति देवः।
[2]प्रणिन्दकः-प्रनिन्दकः-न्दिका, निन्दकः-न्दिका, निनिन्दिषकः-षिका, नेनिन्दकः-न्दिका; निन्दिता-त्री, निन्दयिता-त्री, निनिन्दिषिता-त्री, नेनिन्दिता-त्री; निन्दितम्-तः-तवान्, [3]निन्दकः[A], इत्यादीनिसर्वाण्यपि रूपाणि भौवादिक, जिन्वतिवत् (604) ज्ञेयानि।

## (675) "णिद्द कुत्सासन्निकर्षयोः" (I-भ्वादिः-871. सक. सेट्. उभ.)

'प्रत्येकं निदिनेद्योः स्तां नेदते नेदतीत्युभे।
कुत्सायां सन्निकर्षे वा, कुत्सामात्रे तु निन्दति ॥' (श्लो. 114) इति देवः।
प्रणेदकः-दिका, नेदकः-दिकाः, निनिदिषकः-निनेदिषक-षिका नेनिदकः-दिका; नेदिता-त्री, नेदयिता,त्री निनिदिषिता-निनेदिषिता-त्री, नेनिदिता-त्री;

---

1. अस्य धातोर्निष्ठायामनिट्त्वात्, 'चजोः कुघिण्ण्यतोः' (7-3-52) इति कुत्वम्। एवं घञन्तेऽपि जकारस्य कुत्वेन गकारो ज्ञेयः।
2. 'वा निंसनिक्षनिन्दाम्' (8-4-33) इति कृत्प्रत्ययपरकधातुसम्बन्धिनकारस्य णत्वं विकल्पेन भवति।
3. 'निन्दहिंसक्लिशखाद—' (3-2-146) इत्यादिना तच्छीलादिषु कर्तृषु वुञ्। अकादेशः।

A. 'निन्दको रजनिम्मन्यं दिवसं क्लेशको निशाम्।' भ. का. 7.13.